Code No. **09**

Total No. of Questions : 46 ]

Total No. of Printed Pages : 7 ]

**June/July, 2011**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

I. एतेषां प्रश्नानां उत्तराणि एकवाक्येन संस्कृतभाषायां लिखत — 10 × 1 = 10

1) केषां प्रतिमाः देवकुले स्थाप्यन्ते ?

2) दशरथस्य पितामहः कः ?

3) यदृच्छया भरतेन किमासादितम् ?

4) रूमण्वता जितः राजा कः ?

5) ऐन्द्रजालिकस्य नाम किम् ?

6) निगडेन का संयमिता ?

7) क्षमा कीदृशं धनम् ?

8) बकः कथं मारितः ?

9) कुरुपितामहः कः ?

10) रोदनध्वनिः कुत्र श्रूयते ?

[ Turn over

II. एतेषु **त्रयाणां** भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) वयमयशसा चीरेणार्यो नृपो गृहमृत्युना
प्रततरुदितैः कृत्स्नायोध्या मृगैः सह लक्ष्मणः ।
दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमैः
धिगिति वचसा चोग्रेणात्मा त्वया ननु योजिताः ॥

12) अयशसि यदि लोभः कीर्तयित्वा किमस्मान्
किमु नृपफलतर्षः किं नरेन्द्रो न दद्यात् ।
अथ तु नृपतिमातेत्येष शब्दस्तवेष्टो
वदतु भवति सत्यं किं तवार्यो न पुत्रः ?

13) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ।

14) अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं
प्रहारं हारं वा खर इह समानं गणयति ।
धनुः सज्यं त्यक्त्वा दधति यदिमे पाण्डुतनयाः
कपालं तच्चित्रं दलति न हि तेऽद्यापि हृदयम् ॥

15) भगवति जगदम्ब त्वत्प्रसादाद् दुरात्मा
हत इह बकदैत्यो सन्ति चान्ये बकाभाः ।
वितर बलमथैवं हन्तुमस्माकमेतान्
जयतु भुवि नरेन्द्रो धर्मराजश्चिराय ॥

III. अ) **एकस्य** उत्तरं संस्कृतभाषायां आङ्ग्लभाषायां प्रादेशिकभाषायां वा प्रबन्धरूपेण उत्तरं लिखत — 1 × 8 = 8

16) श्रीहर्षस्य देशकालकृती: तथा शैलीमधिकृत्य प्रबन्धं लिखत ।

17) कुन्ती-ब्राह्मणकुटुम्बयो: संवादं विलिख्य परिणामं विशदयत ।

आ) **द्वयोरेव** लघुटिप्पण्यौ संस्कृतभाषायां, आंग्लभाषायां प्रादेशिकभाषायां वा लिखत — 2 × 4 = 8

18) भरतस्य भ्रातृप्रेम

19) इक्ष्वाकुराजा:

20) प्रवेशक:

21) भीमसेन:

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां लिखत — 4 × 3 = 12

22) त्रीन् दोषान् कोऽभिधास्यति ।

23) हस्तस्पर्शो हि मातृणामजलस्य जलाञ्जलि: ।

24) तथा कुरु यथा बन्धुजनो न स्मरति ।

25) याता सुदुरमधुना गजगामिनी सा ।

26) नास्ति मे कश्चिदनिष्ट: पुत्र: ।

27) दैवं पृष्टत: कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभा: ।

V. अ) **एकस्य** उत्तरं संस्कृतभाषायां, आंग्लभाषायां, प्रादेशिकभाषायां वा प्रबन्धरूपेण लिखत — 1 × 10 = 10

28) ग्रामाध्यक्षस्य पुत्रा: श्रमस्य महिमानं कथं अवगच्छन् ?

29) नाथन: सलादीनाय सर्वधर्मसमभावं कथं निरूपितवान् ?

आ) **द्वयोरेव** संस्कृतभाषायां आंग्लभाषायां प्रादेशिकभाषायां वा लघुटिप्पण्यौ लिखत — 2 × 5 = 10

30) शृगाल:

31) विषया

32) मौलिकमङ्गुलीयकम्

33) दुष्टबुद्धि: ।

[ Turn over

VI. **पञ्चानां** उपप्रश्नानां संस्कृतभाषायां उत्तराणि लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य सन्धिनाम लिखत —

अधुनैव, धनुराचार्यः, चानुगता, इत्यस्ति ।

35) **द्वयोः** लिङ्ग-विभक्ति-वचनानि लिखत —

पटेन, आकाशे, भगिनी, भाषाम् ।

36) **द्वयोः** लकारपुरुषवचनानि लिखत —

शृणु , यास्यामि, आसीत् , श्रूयते ।

37) **द्वयोः** विग्रहवाक्ये लिखत —

देवराजः, ससंभ्रमम् , पञ्चाङ्गुलम् , बन्धुजनः ।

38) **द्वयोः** व्याकरणरीत्या पदपरिचयं कुरुत —

पूजनीयः, रोदितुम् , विसृज्य, स्मृत्वा ।

39) प्रयोगं परिवर्तयत —

सः पायसं पिबति ।

**अथवा**

कुमारेण अयोध्यानगरं प्रविश्यते ।

40) एतयोः वाक्ययोः व्याकरणदोषं परिहृत्य लिखत —

i) जयत भवान् ।

ii) वसुन्धरां सह निष्क्रान्ता ।

41) अत्रत्यमलङ्कारं सलक्षणं निर्दिशत —

दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಭಾರತದಲ್ಲಿ ಬೇರೆ ಬೇರೆ ದೇವರುಗಳನ್ನು ಪೂಜಿಸುವರಿದ್ದಾರೆ. ನೂರಾರು ಹೆಸರುಗಳಿದ್ದರೂ ದೇವರು ಒಬ್ಬನೇ ಇರುವನು. ಆದ್ದರಿಂದ ಭಕ್ತರಲ್ಲಿ ದೇವರ ಹೆಸರಿನಲ್ಲಿ ದ್ವೇಷ ಕೂಡದು. ಅನ್ಯ ದೇವಭಕ್ತನನ್ನು ದ್ವೇಷಿಸುವುದು ಅಧರ್ಮ. ಆಕಾಶದಿಂದ ಬಿದ್ದ ನೀರು ಸಮುದ್ರವನ್ನೇ ಸೇರುತ್ತದೆ. ಹಾಗೆಯೇ ಎಲ್ಲಾ ದೇವರ ಪೂಜೆಯೂ ಪರಮಾತ್ಮನನ್ನೇ ಸೇರುತ್ತದೆ.

There are people worshipping different gods in India. God is one, though there are hundreds of names. Therefore there should be no enmity among the devotees in the name of God. It is Adharma to hate the devotees of other gods. The water falling from the sky reaches the ocean. Worship of all gods reach the same God.

43) इमं परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत — $5 \times 1 = 5$

परोपकारः पुण्याय पापाय परपीडनम् । अनेन वाक्येन भगवता व्यासेन सर्वशास्त्रार्थः सङ्गृहीतः । लोके चतुर्विधाः पुरुषाः समुपलभ्यन्ते । केचन स्वार्थं परित्यज्य परार्थघटकाः । स्वभावादेव परोपकाररताः, केचन स्वार्थाविरोधेन परार्थसाधकाः स्वम् अर्थं साधयन्ति । तथैव परान् अर्थेन योजयन्ति । अपरे केचन परहितं स्वार्थाय घ्नन्ति । अपरे केचन स्वार्थं साधयन्ति, विघटयन्ति च परार्थम् । एते राक्षसादप्यवराः । तत्र प्रथमे श्लाघ्याः । द्वितीयाः न निन्द्याः । तृतीयाः त्याज्याः ।

[ Turn over

चरमे विमान्या: । परस्परापेक्षा हि सर्वेषां सर्वदा विपद्यते । अन्योन्योपकारेण जीवन्ति मानवा: उपकारो हि मैत्रीलक्षणम् । पतङ्गस्योये पुण्डरीकं विकसति । छेदकस्यापि सकाशाच्छायां नोपसंहरति वृक्ष: । अन्येन उपकृतं अण्वपि बहु मन्यन्ते साधव: । कृतघ्नस्तु उपकारशतमपि न गणयति ।

प्रश्ना:

i) सर्वशास्त्रार्थ: केन सङ्गृहीत: ?

ii) लोके कतिविधा: पुरुषा: समुपलभ्यन्ते ?

iii) मानवा: कथं जीवन्ति ?

iv) वृक्ष: किं नोपसंहरति ?

v) कृतघ्न: किं न गणयति ?

**अथवा**

विरामसमये किं कर्तुं चिन्त्यते इति विषयमधिकृत्य मित्राय पत्रमेकं लिखत ।

VIII. 44) अस्य श्लोकस्य अन्वयं लिखत — 3

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवा: ।

न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नत: ॥

45) यथानिर्देशं कुरुत ( त्रयाणामेव ) — 3 × 1 = 3

i) गुरु ........................ = गुरुपदेशः । ( रिक्त स्थानं पूरयत )

ii) इच्छंति .............. .................. । ( इतरवचने लिखत )

iii) सः सार्वभौमः ..................... इति । ( भू धातोः लृट् लकार रूपं )

iv) बालकः ग्रन्थालयं .................... पठति । ( गम् धातोः क्त्वान्ताव्यय रूपं )।

46) परिच्छेदमिमं पठित्वा आवरणस्थानि पदानि चित्वा परिच्छेदं पूरयत — 4

( द्वितीया, भीत्वा, अग्रेसरा, अपालयत् , रूद्रम्मा, अनासक्ता, आङ्गलानां, अत्यजन् )

अस्माकं देशस्य स्वातन्त्र्यार्थम् अनेकाः वीरस्त्रियः स्वप्राणान् .................... । तासु कर्नाटकस्य कित्तुरूप्रान्तस्य राज्ञी चेन्नम्मा .................... । .................. विरुद्धं संभवति स्वातन्त्र्यसमरे तया अग्रतमं स्थानं गृहीतम् । सा कित्तूरूनायकस्य मल्लसर्जस्य ............... राज्ञी आसीत् । स्वपुत्रः मृतोऽपि न ...................... दत्तकपुत्रं स्वीकृत्य राज्यभारम् अकरोत् । प्रथमराज्ञी .................. राज्यभारविषये ..................... आसीत् । अतः मल्लसर्जस्य मरणानन्तरं चेन्नम्मा एव राज्यम् .................... ।